॥ श्रीः ॥

# चरक-संहिता

महामुनिना भगवताग्निवेशेन प्रणीता
महर्षिचरकेण दृढबलेन च प्रतिसंस्कृता

चरकचतुराननश्रीमच्चक्रपाणिदत्तप्रणीतया
आयुर्वेददीपिकाख्यटीकया
महामहोपाध्याय-श्रीगङ्गाधरकविरत्न कविराजविरचितया
जल्पकल्पतरुसमाख्यया टीकया च समलङ्कृता

राष्ट्रिय-संस्कृत-संस्थानम्
मानितविश्वविद्यालयः
नवदेहली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्

# चरक-संहिता

**महामुनिना भगवताग्निवेशेन प्रणीता**
**महर्षिचरकेण दृढ़बलेन च प्रतिसंस्कृता**

चरकचतुराननश्रीमच्चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाख्यटीकया
महामहोपाध्याय-श्रीगङ्गाधरकविरत्न कविराजविरचितया
जल्पकल्पतरुसमाख्यया टीकया च समलङ्कृता

**कविराज श्रीनरेन्द्रनाथ सेनगुप्तेन**
**कविराज श्रीबलाइचन्द्र सेनगुप्तेन च**
सम्पादिता संशोधिता प्रकाशिता च

सूत्रस्थानम्

**प्रथम खण्डः**

सूत्रस्थान १ से १२ अध्याय

**राष्ट्रिय-संस्कृत-संस्थानम्**
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

The firm will replace the copy/copies free of cost if any defect is found


प्रकाशक:

राष्ट्रिय-संस्कृत-संस्थानम्

(मानित विश्वविद्यालय:)

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली-110058

पुनर्मुद्रित संस्करण : 2011

मूल्य : ₹ 610.00

(1-5 भाग सम्पूर्ण)

मुद्रक :

चौखम्भा ओरियन्टालिया

(प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक)

बंग्लो रोड, 9-यू.बी., जवाहर नगर, (कमला नगर के पास)

दिल्ली-110007


Published under the "reprint scheme" of
Rashtriya Sanskrit Sansthan

# CARAKA-SAṂHITĀ

*by*

**The Great Sage Bhagavata Agniveśa**
**Thoroughly revised by**
**Maharṣi Caraka and Dṛdhavala**

*With*

**Āyurvedadīpikā' Commentaries of Śrīmat Cakrapāṇidatta and 'Jalpakalpataru' Explanatory Notes and Annotations of Mahamahopādhyāya Śrī Gaṅgādhar Kaviratna Kavirāja**

*Edited and Revised by*

**Kaviraja Shree Narendranath Sengupta**
**&**
**Kaviraja Shree Balaichandra Sengupta**

**Sūtrasthānām**

## (First Part)

Sutrasthan 1 to 12 Chapters


RASHTRIYA SANSKRIT SANSTHAN

56-57, Institutional Area, Janakpuri,
New Delhi-110058

The firm will replace the copy/copies free of cost if any defect is found

*Published by*
**Rashtriya Sanskrit Sansthan**
(Deemed University)
56-57, Institutional Area, Janakpuri,
New Delhi-110058

**Reprint : 2011**

Printed by
**CHAUKHAMBHA ORIENTALIA**
*(A House of Ayurvedic & Indological Books)*
Bungalow Road, 9-U.B., Jawahar Nagar
(Near Kamla Nagar), Delhi-110 007

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासं गताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविध प्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविध ग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **भगवताग्निवेशेन प्रणीता चरक-संहिता, प्रथम खण्डः** इति नामकः **आयुर्वेदः ग्रन्थः** संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**– राधावल्लभः त्रिपाठी**

# विज्ञापनम् ।

इह खलु निखिलचिकित्साशास्त्राणां प्राणभूताया आयुर्व्वेदसंहितासु मुकुटायमानाया गभीरार्थसङ्कुलतया विदुषामपि दुरधिगमायाश्चरक-संहिताया अध्ययनाध्यापनोपयोगिनो विशुद्धसंस्करणस्य सर्व्वथा अभावोऽनुभूयते आयुर्व्वेदानुरागिभिः सुधीभिः। अस्य प्रतिकारोपायं चिन्तयन्तः केचन महात्मानः संस्कृतटीकया भाषाटीकया च समन्वितामेनां मुद्रयित्वा प्रकाशितवन्तः। परन्तु असम्पूर्णतया दुष्प्रापतया विद्यार्थिनां मनसोऽननुकूलतया च तया तेषामभावः स्वभावं नातिक्रान्तः। आयुर्व्वेदचिकित्सायाः प्रचारबहुले अस्मिन् काले कलिकातानगर्य्यामस्याः सर्व्वाङ्गसुन्दरं संस्करणं न जातमित्यनुशोचतां चिकित्सकानामनुरोधेन साम्प्रतमस्माभिरस्याः टीकाद्वय-सहितं संस्करणं प्रारब्धं, सूत्रस्थानात्मकः प्रथमखण्डः प्राकाश्यं नीतश्च। शेषाश्च सत्वरं प्रकाश्यन्ते।

महामहोपाध्याय-चरकचतुरानन-श्रीमच्चक्रपाणिदत्त-विरचिता आयुर्व्वेद-दीपिकाख्या टीका तथा सुगृहीतनाम्नो वैद्यगङ्गाधरस्य गङ्गाप्रवाहवत् वाञ्छिताधिकफलप्रसूः विपुलविमलकृतिः जल्पकल्पतरुसमाख्या व्याख्या अत्र संस्करणे सन्निवेशिता, सत्यप्यत्र नितरां व्ययबाहुल्ये परिश्रमबाहुल्ये च अध्यापकाध्ययनार्थिनां पठनपाठनासौकर्य्यार्थं सटीकचरकसंहिताया अभावपूरणार्थं गङ्गाधरस्य लुप्तप्रायकीर्त्तिरक्षार्थञ्च वयमत्र धनैः प्राणैश्च प्रयतामहे।

साम्प्रतमाशास्महे सुसंस्कृतेयं चरक-संहिता विद्यार्थिनामध्यापकानाम् आयुर्व्वेदानुरागिणाञ्च चित्ततोषमुत्पादयिष्यतीति।

एतादृशे यत्नबाहुल्येऽपि मुद्रणदोषात् वैदुग्रतिकयन्त्रसंघर्षाच्च अस्यां संयुक्तेकार-उकारादीनि अक्षराणि बहूनि त्रुटितानि, त्रुटिरेषा संशोधनीया सहृदयपाठकैः क्षन्तव्याश्च वयम्।

उपसंहारकाले वक्तव्यम्—अस्याश्चरकसंहितायाः संस्करणे संशोधने च अस्मदायुर्व्वेदविद्यालयाध्यापकेन आयुर्व्वेदशास्त्राटवीसञ्चरणपञ्चाननेन परम-पूज्यपादश्रीयुक्तकविराजचन्द्रशेखरकविरत्नेन असाधारणो यत्नः श्रमश्च कृतः,

अतो वयं तत्समीपे चिरकृतज्ञतापाशेन बद्धाः स्मः। आयुर्व्वेदशैलीकुशलेन कविराज-श्रीयुक्तकुञ्जविहारिकाव्यतीर्थ-धन्वन्तरिणा तथा कविराजवरिष्ठ-श्रीकार्त्तिकचन्द्र-गुप्तेन अत्र महान् श्रमः कृतः अतस्तयोरपि सकाशे चिरकृतज्ञाः स्मः।

वैयाकरणकेशरी पण्डितप्रवरः श्रीयुक्तधीरानन्दकाव्यनिधिरपि अस्याः संशोधनादिविषये यादृशं यत्नं कृतवान् तस्मात् तमपि वयं सकृतज्ञाः स्मरामः।

संस्करणेऽस्मिन् अस्मद्भ्रातरोऽपि अतीव परिश्रमं कृतवन्तः, तेन वयमानन्दसन्दोहं लभामहे।

आयुर्व्वेदाब्धिमन्थात् समभवदतुलः कौस्तुभो दिव्यरत्नं
तेने कान्तिं मनोज्ञां जगति च चरको यत्नतश्चक्रपाणेः।
काले क्षीणप्रभो यो विलसतु नितरां वैद्यवंशावतंस-
श्रीमद्गङ्गाधरस्यामलतनविवृतेराश्रयात् साम्प्रतं सः॥

शकाब्दाः—१८४९,
श्रावणी पौर्णमासी।

कविराज-श्रीनरेन्द्रनाथ-सेनगुप्तः।
तथा
कविराज-श्रीबलाइचन्द्र-सेनगुप्तः।

# सूत्रस्थानस्य सूचीपत्रम्।

## प्रथमोऽध्यायः।


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| दीर्घञ्जीवितीयोऽध्यायः ... | १ | २ |
| आयुर्व्वेदस्य आगमः ... | ९ | १ |
| आयुर्व्वेदागमहेतुः .. | १३ | १ |
| आयुर्व्वेदसूत्रणम् | २० | १ |
| सूत्रगस्याभ्यनुज्ञानम् ... | २७ | १ |
| आयुर्व्वेदनिर्णयः ... | २९ | ३ |
| आयुषः सपर्य्यायलक्षणम् | ३१ | १ |
| सामान्यविशेषयोर्लक्षणम् | ३५ | १ |
| आयुर्व्वेदक्रियोपयोगिपुरुषस्य निर्द्देशः | ४५ | १ |
| द्रव्यसंग्रहः | ५२ | १ |
| गुणसंग्रहः ... ... | ६१ | १ |
| समवायलक्षणम् ... | ७१ | १ |
| द्रव्य-गुणयोर्लक्षणम् | ९६ | १ |
| कर्म्मलक्षणम् ... | १११ | २ |
| आयुर्व्वेदस्य प्रयोजनम् | ११३ | २ |
| व्याधीनां त्रिविधो हेतुसंग्रहः | ११७ | १ |
| व्याधीनामाश्रयनिर्द्देशः | १२९ | १ |
| शारीर-मानसदोषसंग्रहः | १६४ | १ |
| वातादीनां गुणाः प्रशमोपायाश्च | १७२ | १ |
| चिकित्सासूत्रम् ... | १७६ | १ |
| रसस्य लक्षणमुत्पत्तिक्रमश्च ... | १८१ | १ |
| रसानां संग्रहः ... | १८५ | १ |
| त्रिविधद्रव्यस्य निर्द्देशः | १८७ | १ |
| तस्य जाङ्गमादिभेदेन निर्द्देशः | १९१ | १ |
| मूलिनी-फलिन्योर्नाम-कर्म्माणी | १९५ | ४ |
| चतुर्व्विधस्नेहस्य गुणकर्म्माणी | १९८ | १ |
| लवण-मूत्र-क्षीराणां नामगुण-कर्म्माणि ... | १९९ | १ |
| भिषग्-भिषक्तमयोर्लक्षणम् | २०८ | १ |
| ज्ञाताज्ञातयोरौषधयोर्दोषगुणाः | २०८ | ५ |
| विज्ञातस्यापि दुष्प्रयुक्तस्यौषधस्य दोषाः .. ... | २०९ | ७ |
| वैद्यापवादः ... ... | २१० | ५ |
| अध्यायार्थोपसंहारः ... | २१३ | १ |


## द्वितीयोऽध्यायः


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| अपामार्गतण्डुलीयोऽध्यायः ... | २१७ | २ |
| शिरोविरेचनद्रव्याणां निर्द्देशः | २१७ | ४ |
| वमनद्रव्याणां निर्द्देशः ... | २१९ | १ |
| विरेचनद्रव्याणां निर्द्देशः ... | २१९ | ५ |
| विविधयवागूनां निर्द्देशः ... | २२२ | ३ |
| अध्यायार्थोपसंहारः ... | २२८ | ६ |


## तृतीयोऽध्यायः।


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| आरग्वधीयोऽध्यायः ... | २३० | २ |
| आरग्वधादि-द्वात्रिंशच्चूर्ण-प्रदेहानां निर्द्देशः ... | २३० | ३ |


## चतुर्थोऽध्यायः।


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| षड्विरेचनशताश्रितीयोऽध्यायः | २४० | |
| षड्विरेचनाश्रयाणां निर्द्देशः | २४४ | |
| पञ्चकषाययोनीनां निर्द्देशः | २४४ | |
| पञ्चविधकषायकल्पनस्य निर्द्देशः | २४५ | |
| जीवनीयो वर्गः ... | २५१ | |
| बृंहणीयो वर्गः ... | २५२ | |

तैलमेतत् त्रिदोषघ्नमिन्द्रियाणां बलप्रदम्।
प्रयुञ्जानो यथाकालं यथोक्तानश्नुते गुणान्॥ २४॥
आपोथिताग्रं द्वौ कालौ कषायं कटुतिक्तकम्।
भक्षयेद् दन्तपवनं दन्तमांसान्यबाधयन्॥
निहन्ति गन्धवैरस्यं जिह्वादन्तास्यजं मलम्।
निष्कृष्य रुचिमाधत्ते सद्यो दन्तविशोधनम्॥ २५॥

त्रीणि दिनानि हित्वा परदिनं त्रिभिर्नावनैरर्द्धपलं तैलं पिचुना स्निग्धस्विन्नोत्तमाङ्गस्य प्रयुञ्जीत, तद्दिनमारभ्य पञ्चमदिनं पुनर्दानदिनं भवति। यतः पुनस्त्र्यहाच्च त्रीणि दिनानि हित्वा परं दिनं तथैव प्रयुञ्जीत। एवं सप्ताहमेव अर्थान्मासि मासि नावनकर्म्म समाचरेत। एतेन दिनत्रयं न दत्त्वा नावनमपरदिने दद्यादित्यर्थः। अस्य प्रणिहिततैलस्योपचारमाह—निवातेत्यादि। यथोक्तान् यथा प्रोक्तान्, न त्वव्ययीभावः।

अथ प्रत्यासत्त्योर्द्ध्वजत्रुकार्य्यत्वेन च दन्तकाष्ठं गुणत आचार्य्येणोक्तं, किन्त्वसंगत्या प्रातःकृत्यं नोक्तं तदत्र बोध्यम्। तद्यथा—"ब्राह्मे मुहूर्त्ते उत्तिष्ठेत स्वस्थो रक्षार्थमायुषः। शरीरचिन्तां निर्व्वर्त्य कृतशौचविधिस्ततः॥" इति। "उदयात् पूर्व्वमुहूर्त्तौ ब्राह्मरौद्रौ क्रमाद्विदुः" इति॥ २४॥

गङ्गाधरः—आपोथिताग्रमित्यादि। पुथ हिंसे इत्यस्याङ्पूर्व्वकत्वेनापोथितं कुट्टितमित्यर्थः। द्वौ कालाविति प्रातः सायञ्च। अत्र केचित "प्रातर्भुक्त्वा च मृद्वग्रम्" इति पठन्ति, तन्न, भुक्त्वेत्यनेन सायमित्यर्थलाभात्। भक्षयेदिति चौरादिकभक्षिः। भक्षणं चर्व्वणमात्रमिह विवक्षितं गलाधःकरणजनकचर्व्वणादिव्यापारस्य भक्षार्थत्वेऽप्यत्र तु गलाधःकरणे विवक्षाभावात्। दन्तपवनं पूयन्ते दन्ता अनेनेति दन्तकाष्ठम्। दन्तमांसानीति दन्तवेष्टनमांसानि। अबाधयन्नघर्षन्। गुणमस्याह—निहन्तीत्यादि। दन्तविशोधनं कर्त्तृ मलं निष्कृष्येति सम्बन्धः। सद्यो रुचिमाधत्ते इत्यर्थः॥ २५॥

तूलकपिण्डकया, नावनैस्त्रिभिर्वारत्रयेणेत्यर्थः। त्र्यहात् त्र्यहादिति एकैकं दिनमन्तरीकृत्य, सप्ताहमित्यन्तरितदिनानि वर्ज्जयित्वा तेनैकैकस्मिन् ऋतौ त्रयोदशाहं नस्यप्रयोगः समाप्यते॥ २४॥

चक्रपाणिः—स्थानप्रत्यासत्त्या दन्तकाष्ठगुणान् दर्शयति—आपोथितेत्यादि। द्विकालं सायं प्रातरिति। दन्तान् पुनातीति दन्तपवनं दन्तकाष्ठं; निष्कृष्य मलमिति सम्बन्धः। ककुभो-



करञ्जकरवीरार्क-मालतीककुभासनाः।
शस्यन्ते दन्तपवने ये चाप्येवंविधा द्रुमाः॥ २६॥
धार्य्याण्यास्येन वैशद्य-रुचिसौगन्ध्यमिच्छता।
जातीकटुकपूगानां लवङ्गस्य फलानि च॥

गङ्गाधरः—दन्तपवनार्थं द्रुमानाह—करञ्जेत्यादि। ककुभोऽर्ज्जुनः, असनः पीतशालः। एवंविधा एवंरसा इत्यर्थः। अत्र दन्तकाष्ठानर्हा उक्ता अन्यत्र तद्यथा—

"नाद्यादजीर्णवमथु-श्वासकासज्वरार्द्दितः।
तृष्णास्यपाकहृन्नेत्र-शिरःकर्णामयी च तत्॥" इति।

अत्र तदिति दन्तपवनमिति। अथात्र मुखकार्य्यत्वसामान्याज्जिह्वानिर्लेखनं गुणतो वक्तुमुचितमपि ग्रन्थबाहुल्यभयान्नोक्तं, तदपि बोध्यमन्यत्रोक्तं, तद्यथा—

"सुवर्णरौप्यताम्राणि त्रपुरीतिमयानि च।
जिह्वानिर्लेखनानि स्युरतीक्ष्णान्यनृजूनि च॥
जिह्वामूलगतं यच्च मलमुच्छ्वासरोधि च।
सौगन्ध्यं भजते तेन तस्माज्जिह्वां विनिर्लिखेत॥"
"जिह्वानिर्लेखनं शस्तं मृदु श्लक्ष्णं दशाङ्गुलम्॥" इति।

सुवर्णेत्यादि। त्रपु सीसकं, रीतिः पित्तलम्, अतीक्ष्णानि धाररहितानि, अनृजूनि वक्राणि। अन्यत्रोक्तकर्म्मोपदर्शनपूर्व्वकतद्विधिमाह—जिह्वेत्यादि। यद्-यस्मात मलं जिह्वामूलगतमुच्छ्वासरोधि च भवति तस्माज्जिह्वां विनिर्लिखेत। तेन सौगन्ध्यं भजते मुखमिति शेषः। यद्वा तेनेति वक्ष्यमाणजिह्वाविनिर्लखनेनेत्यभिप्रायेण यच्चेति मलमित्यनेन योगः। चः पुनरर्थे॥ २६॥

गङ्गाधरः—मुखकार्य्यत्वसामान्यात् ताम्बूलभक्षणरूपेण मुखे धार्य्याण्याह—धार्य्याणीत्यादि। जातीत्यादीनां फलानीत्यनेनान्वयः। जात्याः फलं जातिफलाख्यं, कटुकस्य लताकस्तूर्य्याः फलानि, पूगस्य गुवाकस्य फलानि, लवङ्गस्य यद्यपि पुष्पवृन्तं लवङ्गमाहुस्तथापि तत्पुष्पवृन्तरूपेण यत दृश्यते तदेव।

ऽर्ज्जुनः, एवंविधा एवंरसा इत्यर्थः। कटुकं लताकस्तूरी, यद्यपि लवङ्गस्य वृन्तमभिप्रेतं तथापि बहूनां फलस्य ग्राह्यत्वात् छत्त्रिणो गच्छन्तीति न्यायेन सामान्येन फलमित्युक्तम्॥ २५—२७॥

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्

# चरक-संहिता

## महामुनिना भगवताग्निवेशेन प्रणीता
## महर्षिचरकेण दृढ़बलेन च प्रतिसंस्कृता

**चरकचतुराननश्रीमच्चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाख्यटीकया**
**महामहोपाध्याय-श्रीगङ्गाधरकविरत्न कविराजविरचितया**
**जल्पकल्पतरुसमाख्यया टीकया च समलङ्कृता**

**कविराज श्रीनरेन्द्रनाथ सेनगुप्तेन**
**कविराज श्रीबलाइचन्द्र सेनगुप्तेन च**
सम्पादिता संशोधिता प्रकाशिता च

सूत्रस्थानम्

## द्वितीय खण्डः

सूत्रस्थान १३ से ३० अध्याय समाप्तम्

## राष्ट्रिय-संस्कृत-संस्थानम्
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

The firm will replace the copy/copies free of cost if any defect is found


प्रकाशक:

**राष्ट्रिय-संस्कृत-संस्थानम्**

(मानित विश्वविद्यालय:)

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली-110058

**पुनर्मुद्रित संस्करण : 2011**

**मूल्य : ₹ 610.00**

**( 1-5 भाग सम्पूर्ण )**

मुद्रक :

**चौखम्भा ओरियन्टालिया**

(प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक)

बंग्लो रोड, 9-यू.बी., जवाहर नगर, (कमला नगर के पास)

दिल्ली-110007


Published under the "reprint scheme" of
Rashtriya Sanskrit Sansthan

# CARAKA-SAṂHITĀ

*by*

**The Great Sage Bhagavata Agniveśa**
**Thoroughly revised by**
**Maharṣi Caraka and Dṛdhavala**

*With*

**Āyurvedadīpikā' Commentaries of Śrīmat Cakrapāṇidatta and 'Jalpakalpataru' Explanatory Notes and Annotations of Mahamahopādhyāya Śrī Gañgādhar Kaviratna Kavirāja**

*Edited and Revised by*

**Kaviraja Shree Narendranath Sengupta**
&
**Kaviraja Shree Balaichandra Sengupta**

**Sūtrasthānām**

## (Second Part)

Sutrasthan 13 to 30 Chapters Samaptam


**RASHTRIYA SANSKRIT SANSTHAN**

56-57, Institutional Area, Janakpuri,
New Delhi-110058

The firm will replace the copy/copies free of cost if any defect is found

*Published by*
**Rashtriya Sanskrit Sansthan**
(Deemed University)
56-57, Institutional Area, Janakpuri,
New Delhi-110058

**Reprint : 2011**

Printed by
**CHAUKHAMBHA ORIENTALIA**
*(A House of Ayurvedic & Indological Books)*
Bungalow Road, 9-U.B., Jawahar Nagar
(Near Kamla Nagar), Delhi-110 007

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्य: प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदा:, शास्त्रीयं वाङ्मयम्, इतिहास:, पुराणानि, काव्यानीत्यनेकरचना: विकासं गता:। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविध प्रयासै: प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमा: परम्परा: संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाश-नार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविध ग्रन्थमाला: संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुन: प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृत: **भगवताग्निवेशेन प्रणीता चरक-संहिता, द्वितीय खण्ड:** इति नामक: **आयुर्वेद: ग्रन्थ:** संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यत्रीयते। एषोऽपि ग्रन्थ: सर्वै: यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्य: सर्वेभ्य: संस्थानस्य अधिकारिभ्य: सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**– राधावल्लभ: त्रिपाठी**

किंयोनयः कति स्नेहाः के च स्नेहगुणाः पृथक्।
कालानुपाने के कस्य कति काश्च विचारणाः ॥
कति मात्राः कथंमानाः का च केषूपदिश्यते।
कश्च केभ्यो हितः स्नेहः प्रकर्षः स्नेहने च कः ॥
स्नेह्याः के के च न स्नेह्याः स्निग्धातिस्निग्धलक्षणम्।
किं पानात् प्रथमं पीते जीर्णे किञ्च हिताहितम् ॥
के मृदुक्रूरकोष्ठाः का व्यापदः सिद्धयश्च काः।
अच्छे संशोधने चैव स्नेहे का वृत्तिरिष्यते ॥
विचारणाः केषु योज्या विधिना केन तत् प्रभो।
स्नेहस्यामितविज्ञान! ज्ञानमिच्छामि वेदितुम् ॥२॥
अथ तत्संशयच्छेत्ता प्रत्युवाच पुनर्व्वसुः।
स्नेहानां द्विविधा सौम्य! योनिः स्थावरजङ्गमा ॥३॥

स्वसंशयविषयानाह—किंयोनय इत्यादि। स्नेहाः किंयोनयः का योनिर्येषां ते किंयोनय इति। स्नेहविषये स्नेहानां का योनिरित्यादिकान् पञ्चविंशतिमश्नान् कृताग्निवेश उवाच—हे गुरोऽमितविज्ञान प्रभो स्नेहस्य तज्ज्ञानं वेदितुमिच्छामि ॥ २ ॥

गङ्गाधरः—अथैवमग्निवेशेन पृष्टः पुनर्व्वसुस्तत्संशयच्छेता क्रमेण प्रत्युवाच—तद् यथा—स्नेहानामित्यादि। किंयोनयः स्नेहा इति प्रथमप्रश्नस्योत्तरमाह। हे सौम्याग्निवेश स्नेहानां योनिर्द्विविधा स्थावरा योनिर्जङ्गमा च योनिः।

किं योनयः किं वा आधारकारणाः; कालश्चानुपानञ्च कालानुपाने, विचारणा द्रव्यान्तरासंयुक्तस्नेहपानं वर्जयित्वा स्नेहोपयोगः, कथंमानाः कीदृङ्मानाः, का चेति मात्रा, प्रकर्षः कालप्रकर्षः, स्नेहने स्नेहयुक्तिक्रियायां; के न चेति के न च स्नेह्याः, किं पानात् प्रथमं पूर्व्वं हिताऽहितं, किञ्च पीते तु स्नेहे तथा जीर्णे च स्नेहे हिताहितमिति योज्यम्; सिद्धयो व्यापत्साधनानि भेषजानि। अच्छ इति पृथङ्निर्देशात् गोवलीवर्द्दन्यायेन संशमन इति भवति। वृत्तिरिति, वृत्तिरुपचारविधानं, ज्ञानं शास्त्रम् ॥ २।३ ॥



तिलः पियालाभिषुकौ विभीतक-
श्चित्राभयैरण्डमधूकसर्षपाः।
कुसुम्भविल्वारुकमूलकातसी-
निकोठकाक्षोडकरञ्जशिग्रुकाः ॥
स्नेहाश्रयाः * स्थावरसंज्ञितास्तथा
स्युर्जाङ्गमा मत्स्यमृगाः सपक्षिणः।
तेषां दधि क्षीरघृतामिषं वसा
स्नेहेषु मज्जा च तथोपदिश्यते ॥ ४ ॥
सर्व्वेषां तैलजातानां तिलतैलं विशिष्यते।
बलार्थे स्नेहने चाग्र्यमैरण्डन्तु विरेचने ॥ ५ ॥

तत्र तिलादयः स्थावरसंज्ञिताः स्नेहाश्रया योनयः स्युः। अभिषुक औत्तरापथिकः, चित्रा रक्त एरण्डः गोरक्षकर्कटीवीजं जयपालवीजं वा, अभया हरीतकी, अरुकः अरुष्करः भल्लातकफलम्, निकोठकः क्षुद्र आक्षोडः, आक्षोडः पर्व्वतस्थ आक्षोड़ः। जङ्गमस्नेहयोनिमाह—स्युर्जङ्गमा मत्स्यमृगाः पक्षिणश्च स्नेहयोनयः। तेषां दध्यादिकं स्नेहेषूपदिश्यते न तु रोमादिकम्। स्थावरजङ्गमयोनिनिर्देशेनैव कति स्नेहा इति द्वितीयप्रश्नस्याप्युत्तरमुक्तम्। तिलतैलमित्यादि भेदाः स्थावरस्नेहाः। दध्यादिभेदा जङ्गमस्नेहाः। इति ॥ ३।४ ॥

गङ्गाधरः—अथ के च स्नेहगुणाः पृथगिति तृतीयप्रश्नस्योत्तरमाह—सर्व्वेषामित्यादि। तिलादीनां वीजप्रभवः सर्व्वः स्थावरः स्नेहस्तैलमुच्यते लोके। सर्व्वेषां तैलजातानां तैलसमूहानां मध्ये तिलतैलं प्रशस्तगुणतो विशिष्यते। तदाह—बलार्थे स्नेहने च यतोऽग्र्यं तिलतैलं ततो विशिष्यते

चक्रपाणिः—अभिषुक औत्तरापथिकः, चित्रा गोरक्षकर्कटी तद्वीजमिह, यदि वा, चित्रा लोहितैरण्डः, अतसी उमा इति ख्याता, अरुकनिकोठाक्षोडा औत्तरापथिकाः, स्नेहाशयाः स्नेहस्थानानि, एते च आविष्कृततमत्वेनोक्ताः, तेन निम्बतैलादयो बोद्धव्याः, आमिषं मांसम् ॥ ४ ॥

चक्रपाणिः—तैलजातानामिति, जातशब्दः प्रकारवचनः, यथा—"यदाहारजातमग्निवेश" इत्यादि, अत्र यद्यपि योगात् तिलभवमेव तैलं, तथापि रूढेरिह सर्व्व एव स्थावरस्नेहास्तैलमित्युच्यन्ते,

* स्नेहाशया इति वा पाठः।

स्वभावतः । मत्स्यवत् परिवर्त्तन्ते तस्माद्यत्नेन ताड़येत् ॥ अजानता गृहीते तु शस्त्रे कायनिपातिते । भवन्ति व्यापदश्चैता बहवश्चाप्युपद्रवाः ॥ स्नेहादिभिः क्रियायोगैर्न तथा लेपनैरपि । यान्त्याशु व्याधयः शान्तिं यथा सम्यक् सिराव्यधात् ॥ सिराव्यधश्चिकित्सार्द्धं शल्यतन्त्रे प्रकीर्त्तितः । यथा प्रणिहितः सम्यग् वस्तिः कायचिकित्सिते ॥ तत्र स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासितसिराविद्धैः परिहर्त्तव्यानि क्रोधायासमैथुनदिवास्वप्नवाग्व्यायामयानोत्थानासनचंक्रमणशीतवातातपविरुद्धासात्म्याजीर्णान्या बलल्लाभान्मासमेके मन्यन्ते । एतेषां विस्तरमुपरिष्टाद्वक्ष्यन्ते । भवतश्चात्र । सिराविषाणतुम्बैस्तु जलौकाप्रच्छनैस्तथा । अवगाढं यथापूर्व्वं निर्हरेद्दुष्टशोणितम् ॥ अवगाढे जलौका स्यात् प्रच्छनं पिण्डिते हितम् । सिराङ्गव्यापके रक्ते शृङ्गालाबुस्त्वचि स्थिते ॥" इत्येवं शोणितस्रावणाय वैद्यः स्वधिगतसर्व्वशास्त्रार्थोऽपि शस्त्रावचारणे योग्यां कुर्य्यात् । उक्तं हि सुश्रुते—"सुबहुश्रुतोऽप्यकृतयोग्यः कर्म्मस्वयोग्यो भवति । तत्र पुष्पफलालाबुकालिन्दकत्रपुषैर्व्वारुककर्कारुकप्रभृतिषु च्छेद्यविशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत् । दृतिवस्तिप्रसेकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्याम् । सरोम्णि चर्म्मण्याततै लेख्यस्य । मृतपशुसिरासूत्पलनालेषु च व्यध्यस्य । घुणोपहतकाष्ठवेणुनं(नल)शनालीशुष्कालाबुमुखेष्वेष्यस्य । पनसविम्बीविल्वफलमज्जमृतपशुदन्तेष्वाहार्य्यस्य । मधूच्छिष्टोपलिप्ते शाल्मलीफलके विस्राव्यस्य । सूक्ष्मघनवस्त्रान्तयोर्मृदुचर्म्मान्तयोश्च सीव्यस्य । पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धयोग्याम् । मृदुमांसपेशीषूत्पलनालेषु च कर्णसन्धिबन्धयोग्याम् । मृदुषु मांसखण्डेष्वग्निक्षारयोग्याम् । उदकपूर्णघटपार्श्वस्रोतस्यलाबुमुखादिषु च नेत्रप्रणिधानवस्तिव्रणवस्तिपीड़नयोग्यामिति । भवतश्चात्र । एवमादिषु मेधावी योग्यार्हेषु यथाविधि । द्रव्येषु योग्यां कुर्व्वाणो न प्रमुह्यति कर्म्मसु ॥ तस्मात् कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्म्मसु । यस्य यत्रेह साधर्म्म्यं तत्र योग्यां समाचरेत् ॥" इति । एवं कृतयोग्यो वैद्योऽष्टविधशस्त्रावचारणाय शस्त्राणि विंशतिं जानीयात् । उक्तं हि सुश्रुते—"विंशतिः शस्त्राणि । तद्यथा—मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखान्तर्म्मुखत्रिकूर्च्चककुठारिकाव्रीहिमुखारावेतसपत्रकवड़िशदन्तशङ्क्वेषण्य इति । तत्र मण्डलाग्रकरपत्रे स्यातां च्छेदने लेखने च । वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि च्छेदने भेदने च । सूचीकुशपत्राटीमुखशरारीमुखान्तर्म्मुखत्रिकूर्च्चकानि विस्रावणे । कुठारिकाव्रीहिमुखारावेतसपत्रकाणि व्यधने सूची च । वड़िशो दन्त-



शङ्कुश्चाहरणे । एषण्येषणे आनुलोम्ये च । सूच्यः सीवने । इत्यष्टविधे कर्म्मण्युपयोगः शस्त्राणां व्याख्यातः । तेषामथ यथायोगग्रहणसमासोपायः कर्म्मसु वक्ष्यते । तत्र वृद्धिपत्रं वृन्तफलसाधारणे भागे गृह्णीयाद्भेदनान्येवं सर्व्वाणि । वृद्धिपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने बहुशोऽवचार्य्यम् । वृन्ताग्रे विस्रावणानि । विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्च्चकेन विस्रावयेत् । तलप्रच्छादितवृन्तमङ्गुष्ठप्रदेशिनीभ्यां व्रीहिमुखम् । कुठारिकां वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुल्यङ्गुष्ठविष्टब्धयाऽभिहन्यात् । आराकरपत्रैषण्यो मूले । शेषाणि तु यथायोगं गृह्णीयात् । तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः । तत्र नखशस्त्रैषण्यावष्टाङ्गुले । सूच्यो वक्ष्यन्ते । वड़िशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथमयवपत्रमुखे । एषणी गण्डूपदाकारमुखी । प्रदेशिन्यग्रपर्व्वप्रदेशसमाना मुद्रिका । दशाङ्गुला शरारीमुखी सा कर्त्तरीति कथ्यते । शेषाणि तु षड़ङ्गुलानि । तानि सुग्रहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितमुखाग्राणि अकरालानि चेति शस्त्रसम्पत् । तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः । अतो विपरीतगुणमाददीत अन्यत्र करपत्रात् तद्धि खरधारमस्थिच्छेदनार्थम् । तत्र धारा भेदनानां मासूरी । लेखनानामर्द्धमासूरी । व्यधनानां विस्रावणानाञ्च कैशिकी । छेदनानामर्द्धकैशिकीति । तेषां पायना त्रिविधा, क्षारोदकतैलेषु । तत्र क्षारपायितं शरशल्यास्थिच्छेदनेषु । उदकपायितं मांसच्छेदनभेदनपाटनेषु । तैलपायितं सिराव्यधनस्नायुच्छेदनेषु । तेषां निशाणार्थं श्लक्ष्णशिला माषवर्णा । धारासंस्थापनार्थं शाल्मलीफलकमिति । भवति चात्र । यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम् । सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत् ॥ अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुल्य इति । शिशूनां शस्त्रभीरूणां शस्त्राभावे तु योजयेत् । त्वक्सारादिचतुर्व्वर्गं छेद्ये भेद्ये च बुद्धिमान् ॥ आहार्य्यच्छेद्यभेद्येषु नखं शस्त्रेषु योजयेत् । विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम् ॥ ये स्युर्मुखगता रोगा नेत्रवर्त्मगताश्च ये । गोजीशेफालिकाशाक-पत्रैर्विस्रावयेत् तु तान् ॥ एष्येषु त्वेषणालाभे बालाङ्गुल्यङ्कुरा हिताः । शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु ॥ कारयेत् करणैः प्राप्तं कर्म्मारं कर्म्मकोविदम् । प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः । तस्मात् परिचयः कार्य्यः शस्त्राणामादितः सदा ॥" इति ।

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्

# चरक-संहिता

महामुनिना भगवताग्निवेशेन प्रणीता
महर्षिचरकेण दृढ़बलेन च प्रतिसंस्कृता

चरकचतुराननश्रीमच्चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाख्यटीकया
महामहोपाध्याय-श्रीगङ्गाधरकविरत्न कविराजविरचितया
जल्पकल्पतरुसमाख्यया टीकया च समलङ्कृता

कविराज श्रीनरेन्द्रनाथ सेनगुप्तेन
कविराज श्रीबलाइचन्द्र सेनगुप्तेन च
सम्पादिता संशोधिता प्रकाशिता च

निदान-विमान-शारीर-इन्द्रियभिधान-स्थानचतुष्टयसमन्वित:

## तृतीय खण्ड:

राष्ट्रिय-संस्कृत-संस्थानम्
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

The firm will replace the copy/copies free of cost if any defect is found

प्रकाशक:
राष्ट्रिय-संस्कृत-संस्थानम्
(मानित विश्वविद्यालय:)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

पुनर्मुद्रित संस्करण : 2011
मूल्य : ₹ 610.00
(1-5 भाग सम्पूर्ण)

मुद्रक :
चौखम्भा ओरियन्टालिया
(प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक)
बंग्लो रोड, 9-यू.बी., जवाहर नगर, (कमला नगर के पास)
दिल्ली-110007

Published under the "reprint scheme" of
Rashtriya Sanskrit Sansthan

# CARAKA-SAṂHITĀ

*by*

The Great Sage Bhagavata Agniveśa
Thoroughly revised by
Maharṣi Caraka and Dṛdhavala

*With*

Āyurvedadīpikā' Commentaries of Śrīmat Cakrapāṇidatta and
'Jalpakalpataru' Explanatory Notes and Annotations of
Mahamahopādhyāya Śrī Gaṅgādhar
Kaviratna Kavirāja

*Edited and Revised by*
Kaviraja Shree Narendranath Sengupta
&
Kaviraja Shree Balaichandra Sengupta

Sūtrasthānām
Nidāna-Vimāna-Śārīra-Indriābhidhanasthāna
## (Third Part)

RASHTRIYA SANSKRIT SANSTHAN
56-57, Institutional Area, Janakpuri,
New Delhi-110058

The firm will replace the copy/copies free of cost if any defect is found

*Published by*
**Rashtriya Sanskrit Sansthan**
(Deemed University)
56-57, Institutional Area, Janakpuri,
New Delhi-110058

**Reprint : 2011**

Printed by
**CHAUKHAMBHA ORIENTALIA**
*(A House of Ayurvedic & Indological Books)*
Bungalow Road, 9-U.B., Jawahar Nagar
(Near Kamla Nagar), Delhi-110 007

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासं गताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविध प्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविध ग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **भगवताग्निवेशेन प्रणीता चरक-संहिता, तृतीय खण्डः** इति नामकः **आयुर्वेदः ग्रन्थः** संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**- राधावल्लभः त्रिपाठी**

# निदानस्थानस्य सूचोपत्रम् ।

## प्रथमोऽध्यायः ।


| विषयाः | | पृष्ठे | पङ्क्तौ |
|---|---|---|---|
| ज्वरनिदानाध्यायः | ... | ११९३ | ३ |
| निदानस्य पर्य्यायः | ... | ११९४ | १ |
| निदानस्य भेदाः | .. | ११९६ | १ |
| व्याधेः पर्य्यायः | ... | १२०३ | १ |
| व्याधेर्ज्ञानोपायाः | ... | १२०४ | १ |
| पूर्व्वरूपलक्षणम् | ... | १२१२ | १ |
| रूपस्य लक्षणं पर्य्यायश्च | ... | १२१७ | १ |
| उपशयलक्षणम् | ... | १२२० | १ |
| सम्प्राप्तेः पर्य्यायः प्रकारभेदश्च | | १२२७ | १ |
| ज्वरस्य प्रथमत्वोपदेशे हेतुः | | १२३७ | १ |
| तस्याष्टौ कारणानि | ... | १२३८ | १ |
| वातज्वरस्य निदानादीनि | ... | १२४० | १ |
| पित्तज्वरस्य निदानादीनि | ... | १२४५ | १ |
| कफज्वरस्य निदानादीनि | ... | १२४८ | १ |
| द्वन्द्व-सान्निपातिकज्वराणां सम्प्राप्ति-लिङ्गानि च | ... | १२५१ | १ |
| आगन्तुज्वरस्य निदानादीनि | | १२५२ | १ |
| ज्वरस्य स्वरूपं द्वैविध्यञ्च | ... | १२५५ | ३ |
| ज्वरस्य पूर्व्वरूपाणि | ... | १९५७ | ३ |
| ज्वरस्य पूर्व्वोत्पत्तिप्रकारान्तरं सर्व्वव्याधिप्राधान्यञ्च | ... | १२५९ | ३ |
| ज्वरपूर्व्वरूपे चिकित्साविधिः | | १२६१ | ५ |
| जीर्णज्वरे चिकित्सासूत्रम् | | १२६२ | ५ |
| अध्यायार्थोपसंहारः | | २६५ | १ |


## द्वितीयोऽध्यायः ।


| विषयाः | | पृष्ठे | पङ्क्तौ |
|---|---|---|---|
| रक्तपित्तनिदानाध्यायः | ... | १२६७ | १ |
| रक्तपित्तस्य निदानपूर्व्विका सम्प्राप्तिः | | १२६७ | ६ |
| तस्य पूर्व्वरूपाणि | ... | १२७० | १ |
| तस्य उपद्रवाः | ... | १२७१ | ६ |
| रक्तपित्तनिर्गमे दोषभेदेन मार्गनिर्देशः | ... | १२७२ | १ |
| मार्गभेदेन रक्तपित्तस्य साध्यत्वादि | | १२७२ | ६ |
| रक्तपित्तस्य चिकित्सासूत्रम् | | १२७४ | ३ |
| रक्तपित्तस्य साध्ययाप्यासाध्यत्वे हेतुः | | १२७५ | ४ |
| रक्तपित्तस्यासाध्यलक्षणानि | ... | १२८० | १ |
| अध्यायार्थोपसंहारः | ... | १२८१ | ६ |


## तृतीयोऽध्यायः ।


| विषयाः | | पृष्ठे | पङ्क्तौ |
|---|---|---|---|
| गुल्मनिदानाध्यायः | ... | १२८२ | २ |
| गुल्मस्य संख्या | ... | १२८२ | ४ |
| वातगुल्मः | ... | १२८४ | १ |
| गुल्मस्यावस्थितिस्थानम् | ... | १२८५ | १ |
| गुल्मस्य निरुक्तिः | ... | १२८५ | ३ |
| पित्तगुल्मः ... | ... | १२८७ | ४ |
| श्लेष्मगुल्मः ... | ... | १२८८ | ९ |
| सान्निपातिकगुल्मः | ... | १२८९ | ११ |
| शोणितजगुल्मः | ... | १२९० | ३ |
| गुल्मानां पूर्व्वरूपाणि | ... | १२९३ | १ |
| गुल्मे वातस्य प्रधानता | ... | १२९३ | ८ |
| गुल्मस्य चिकित्सासूत्रम् | ... | १२९३ | ९ |
| अध्यायार्थोपसंहारः | ... | १२९९ | १ |


## चतुर्थोऽध्यायः ।


| विषयाः | | पृष्ठे | पङ्क्तौ |
|---|---|---|---|
| प्रमेहनिदानाध्यायः | ... | १३०० | २ |
| प्रमेहस्य संख्या | ... | १३०० | ४ |
| व्याधिविशेषाणां हेतुः | ... | १३०१ | २ |
| श्लेष्मजप्रमेहस्य निदानम् | ... | १३०३ | ३ |
| श्लेष्मजप्रमेहस्य दूष्यविशेषाः | | १३०४ | ८ |
| श्लेष्मजप्रमेहसम्प्राप्तिः | ... | १३०५ | २ |
| दशविधश्लेष्मजप्रमेहाणां नामानि | | १३०८ | ४ |

एवञ्च [illegible]ानामसत्ता यत्प्रभाव उच्यते तदपि भावावर्त्तनमवस्तु चाभा इत्यभिप्रायेणोक्तमभावाद्भावोत्पत्तिर्नेति गौतमेन। तत्र ह्यवस्तुन्यभावशब्दप्रयो कृत इति। तथा च द्विविधो भवति अभावो वस्तुभूतश्चावस्तुभूतश्च। तत्रास्मि पदस्थनञा नावस्तुभूताभाव उच्यते उपादानोपमर्द्दनासम्भवेन सदुत्पत्त्य पत्तेः। तस्माद् वस्तुभूत एव अभाव इह नञा प्रतिपद्यते।

तत्रोक्तं कणादेन वैशेषिके शास्त्रे असद्वा इदमग्र आसीदिति स्मृता। क्रियागुणव्यपदेशाभावात् प्रागसत्। सदसत्। सतः क्रियागु व्यपदेशाभावादर्थान्तरभावात्। सच्चासत्। यच्चान्यदसदतः तदसदिति पूर्व्वाध्याये दर्शितं व्याख्यातञ्च। तस्मात् तेजोऽबन्नादिभ्यः सर्व्वो ऽन्यदसदिति। वस्तुविशेषः। तद् यथोक्तं श्वेताश्वतरोपनिषदि। काल स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुषेति चिन्त्या। संयोग एषां तु आत्मभावादात्माप्यनीशः सुखदुःखहेतोरिति। कालादीनामेकैकस्यासां जन्माद्यभावान्न कालादन्यतमं ब्रह्मेति चिन्ता, तथैषां संयोगः संघातो न ब्रह्म आत्मभावात्। आत्मा हि नेशः सुखदुःखहेतोरिति। तर्हि किं कारणं ब्रह्मेत्यत उक्तम्। ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढ़ाम्। यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति। ते ब्रह्मवादिनो ध्यानयोगानुगता देवस्यात्मा या शक्तिः प्राक् सर्गात् स्वगुणः प्रभावै निगूढ़ा क्रियागुणव्यपदेशरहिता आसीत् तां ब्रह्म अपश्यन्। तस्या ह्येकस्या एव सर्व्वेषां जन्मजीवनप्रतिष्ठानाधिष्ठानसुखासुखवर्त्तनानि भवन्ति नान्यस्माद एकस्मात् कस्माच्चिदपीति। देवस्तु स यः एकः कालादीनि कारणान्यधि तिष्ठति तस्य देवस्यात्मा शक्तिर्ब्रह्म। नान्यदेवस्य न वा तस्य देवस्यात्मा स्वस्य शक्तिर्ब्रह्म। ज्ञानबलक्रियाशक्त्यादिव्यवच्छेदार्थमात्मेति। तस्माद् देवस्य शक्तिरिति नोक्तम्। वायुरिव प्रभावाख्या शक्तिस्तद्विशिष्टाऽतिसूक्ष्मपरम व्योमरूपा शक्तिश्चेति द्वयमपि शक्तिरूपेणैकमेवासीत् न तु विजातीयद्वैतं यद्वायु आलोककृत् प्रभावस्तद्विशिष्टरूपञ्चेति द्वयं यथा रूपत्वेनैकमेव वस्तु न तु विजातीयद्वैतं न हि रूपादन्य आलोककृत् प्रभावस्तथा शक्तेर्न पृथक् प्रभावाख्या शक्तिरित्यत उक्तमेकमेवाद्वितीयमिति। तदद्वितीयमेकमसद् क्षीरवत्। क्षीरं यथा स्नेहांशे भवत्यपरिणामि चाविकारि स्नेहातिरिक्तभागांशे

गवादावपि षड्धातुसमुदाये यद्यपि वर्त्तते, तथापि सर्व्वप्रधाने नर एव विशेषेण वर्त्तते। ते नातिप्रसिद्धो गवादौ पुरुषशब्दः।



तु परिणामि तत् विक्रियमाण दधितक्रादि भवति स्नेहस्तु घृतनवनीतरूप एव वर्त्तते न तु विवर्त्तते, तद्वदतिसूक्ष्मपरमव्योमरूपा मुख्यांशशक्तिर्न परिणामिनी न च विक्रियते। प्रभावाख्या तु गुणांशभूता शक्तिः परिणामिनी ततो विक्रियते। इत्येवमेका शक्तिरेव सत् खल्वसद्ब्रह्म। ततो वै सदजायतेति।

यथा तदसत एव सतः सदजायत तदुक्तं छान्दोग्योपनिषदि। तदैक्षत बहु स्यां प्रजायेयेति तत् तेजोऽसृजतेत्यादि। तत् सदेवासद्ब्रह्म खलु शक्तिः सर्व्वकाल- मेया प्रभावाख्यया शक्त्या महानिर्व्वाणाख्यं प्रलयं कृत्वैकैवाद्वितीया स्वप्रभाव- गुणनिगूढ़ा सती क्रियागुणव्यपदेशरहितैव प्रसुप्तेवासीत्। तन्महानिर्व्वाणे सर्व्वकालनाशक्तेश्चक्रवद् भ्रमणस्वरूपत्वात् क्रमेण तदत्यये सर्व्वसर्ज्जनाशक्त्युद्रेके प्रथमतो रञ्जनाशक्तिरुद्रिक्ता भवति यदा तदा निशावसाने प्रसुप्तोत्थितपुरुष इव सा शक्तिर्ब्रह्म प्रसुप्तोत्थितेव सती अहं बहु स्याम्। कथमिति प्रजायेयाहं प्रजाः प्रसूयेयेति ऐक्षतालोचयत। तथालोच्य रञ्जनाशक्तिपरिणामरूपं तेजो- ऽसृजत। लोहितमिवाभासमानं लोहितवर्णस्याकररूपं न तु लोहितं तेजः सर्व्वेषां ज्योतिषामाकररूपं ज्योतिश्चक्षुरिव चक्षुरसृजत। अथ तत् तेज ऐक्षत बहु स्यां प्रजायेयेति। तदपोऽसृजतेति। तत् तेजोऽहं बहु स्यां प्रजायेयेत्यालोच्य स्वस्यैकादशांशैकांशं विकुर्व्वदपोऽसृजत। ता आपः शुक्ला इवाभासाः शुक्लवर्णस्य आकररूपा न तु शुक्लाः। तथा रसरूपाः सर्व्वरसानामाकररूपा अमृतरूपा आप इवापः सर्व्वासामपामाकररूपा न त्वापः। तत्रेयं युक्तिः। तस्मात् इत्यादि। यस्मात् तेजस एवादौ जाता आपस्तस्मादिदानीं यत्रकुत्रचित् पुरुषः शोचति शोकात् तेज उद्रिक्तं भवति। तदुद्रेकात् पुरुषः स्विद्यति घर्म्मवान् भवतीति तेजस एवापोऽधिजायन्ते इति। अथ ता आप ऐक्षन्त बहु स्याम प्रजायेमहीति। तदन्नमसृजन्तेति ता आपो वयं बहु स्याम प्रजायेमहीत्यालोच्य स्वैकादशांशैकांशं विकुर्व्वत्योऽन्नमसृजन्त। तदन्नं कृष्णमिवाभासं कृष्णवर्णस्याकरभूतं न तु कृष्णवर्णं गन्धवदाभासं सर्व्वगन्धाकरभूतं न तु गन्धवती पृथिवी। तच्चाद्यमाद्यमिवाद्यानां सर्व्वेषामाकररूपं न त्वाद्यमिति। तेषामेषां तेजोऽबन्नानां मेलने सति लोहित- शुक्लकृष्णवदाभासमाना हिरण्यवर्णवदाभासा सैवाजा शक्तिर्ब्रह्मातिपरमसूक्ष्म- ध्वनिमती परमसूक्ष्मव्योमरूपा गायत्री वागेव देवताविरभूत्। सा शक्ति- प्रभावतेजोऽबन्नानीति पञ्चात्मिकाऽनन्ताचिन्त्यप्रभाववती। एवमुक्तं वायवीये। शक्तिः प्रथमसम्भूता गायत्री सा पदोत्तमेति। इत्येतत् तेजोऽबन्नतन्मय-

इतीदमुक्तं निखिलं यथातथं *
तदन्ववेद्यं सततं भिषग्विदा।
तथा हि सिद्धिश्च यशश्च शाश्वतं
स सिद्धकर्म्मा लभते धनानि च ॥ ४३ ॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने गोमय-चूर्णीयमिन्द्रियं नाम द्वादशोऽध्यायः ॥ १२ ॥

श्लोकसङ्ख्या ॥ ४०५ ॥

गङ्गाधरः—अथैतदिन्द्रियस्थानस्य ज्ञाने वैद्यानां फलमाह—इतीदमित्यादि। सिद्धिं क्रियासिद्धिम् ॥ ४३ ॥

अध्यायं समापयति—अग्नीत्यादि। इतीन्द्रियस्थानं सम्पूर्णम्।

इति वैद्यश्रीगङ्गाधरकविरत्नविरचिते चरकजल्पकल्पतराविन्द्रियस्थानजल्पे पञ्चमस्कन्धे गोमयचूर्णीयद्वादशाध्यायजल्पाख्या द्वादशी शाखा ॥ १२ ॥

सिद्ध्याश्रयञ्च यथा—'इष्टालम्भः सुखेन च' इति ग्रन्थोक्तम्। इतीत्यादिनेन्द्रियस्थानोक्तं प्रमेयजातं महाफलत्वेनावश्यबोध्यतयोपदर्शयन्नुपसंहरति ॥ ४२ । ४३ ॥

इति महामहोपाध्यायचरकचतुराननश्रीमच्चक्रपाणिदत्तविरचितायामायुर्व्वेददीपिकायां चरकतात्पर्य्यटीकायाम् इन्द्रियस्थाने गोमयचूर्णीयेन्द्रियं नाम द्वादशोऽध्यायः ॥ १२ ॥

---

## समाप्तमिदमिन्द्रियस्थानम्।

॥ श्रीः ॥

---

* यथा तथा इत्यपि पाठः।

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्

# चरक-संहिता

महामुनिना भगवताग्निवेशेन प्रणीता
महर्षिचरकेण दृढ़बलेन च प्रतिसंस्कृता

चरकचतुराननश्रीमच्चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाख्यटीकया
महामहोपाध्याय-श्रीगङ्गाधरकविरत्न कविराजविरचितया
जल्पकल्पतरुसमाख्यया टीकया च समलङ्कृता

कविराज श्रीनरेन्द्रनाथ सेनगुप्तेन
कविराज श्रीबलाइचन्द्र सेनगुप्तेन च
सम्पादिता संशोधिता प्रकाशिता च

चिकित्सित-कल्प-सिद्धिनामकस्थानत्रयसमन्वितः

## चतुर्थ खण्डः

चिकित्सास्थान १ से १८ अध्याय

राष्ट्रिय-संस्कृत-संस्थानम्
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

The firm will replace the copy/copies free of cost if any defect is found

प्रकाशकः
राष्ट्रिय-संस्कृत-संस्थानम्
(मानित विश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

पुनर्मुद्रित संस्करण : 2011
मूल्य : ₹ 610.00
(1-5 भाग सम्पूर्ण)

मुद्रक :
चौखम्भा ओरियन्टालिया
(प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक)
बंग्लो रोड, 9-यू.बी., जवाहर नगर, (कमला नगर के पास)
दिल्ली-110007

**Published under the "reprint scheme" of**
**Rashtriya Sanskrit Sansthan**

# CARAKA-SAṂHITĀ

*by*

**The Great Sage Bhagavata Agniveśa**
**Thoroughly revised by**
**Maharṣi Caraka and Dṛdhavala**

*With*

**Āyurvedadīpikā' Commentaries of Śrīmat Cakrapāṇidatta and 'Jalpakalpataru' Explanatory Notes and Annotations of Mahamahopādhyāya Śrī Gaṅgādhar Kaviratna Kavirāja**

*Edited and Revised by*

**Kaviraja Shree Narendranath Sengupta**
&
**Kaviraja Shree Balaichandra Sengupta**

Cikitsita-Kalpa-Siddhināmakasthāna

**(Fourth Part)**

Cikitsasthana 1 to 18 Chapters

**RASHTRIYA SANSKRIT SANSTHAN**
56-57, Institutional Area, Janakpuri,
New Delhi-110058

The firm will replace the copy/copies free of cost if any defect is found

*Published by*
**Rashtriya Sanskrit Sansthan**
(Deemed University)
56-57, Institutional Area, Janakpuri,
New Delhi-110058

**Reprint : 2011**

Printed by
**CHAUKHAMBHA ORIENTALIA**
*(A House of Ayurvedic & Indological Books)*
Bungalow Road, 9-U.B., Jawahar Nagar
(Near Kamla Nagar), Delhi-110 007

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासं गताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविध प्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविध ग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **भगवताग्निवेशेन प्रणीता चरक-संहिता, चतुर्थ खण्डः** इति नामकः **आयुर्वेदः ग्रन्थः** संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**- राधावल्लभः त्रिपाठी**

# चिकित्सितस्थानस्य सूचीपत्रम् ।

## प्रथमोऽध्यायः ।


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| अभयामलकीयरसायनपादः | २२६१ | १ |
| भेषजपर्यायाः | २२६२ | १ |
| भेषजाभेषजयोः प्रकारभेदः | २२६२ | ३ |
| रसायनफलम् | २२६४ | १ |
| रसायनप्रयोगस्य द्वैविध्यम् | २२६७ | १ |
| कुटीप्रावेशिकविधिः | २२६७ | ३ |
| हरीतकीगुणाः | २२७१ | ३ |
| हरीतकीसेवनानर्हाणां निर्द्देशः | २२७२ | ९ |
| आमलकीगुणाः | २२७२ | ११ |
| ब्राह्मरसायनप्रयोगः | ·२७४ | १ |
| ब्राह्मरसायनस्य द्वितीयो योगः | २२७७ | ६ |
| च्यवनप्राशः | २२७९ | ९ |
| चतुर्थामलकरसायनम् | २२८१ | १० |
| पञ्चमो हरीतकीप्रयोगः | २२८२ | ९ |
| रसायनगुणाः | २२८४ | ८ |
| अध्यायपादोपसंहारः | २२८५ | ४ |
| प्राणकामीयरसायनपादः | २२८६ | १ |
| रसायनप्रवृत्तिकारणम् | २२८७ | १ |
| आमलकघृतम् | २२८८ | २ |
| आमलकावलेहः | २२९० | ७ |
| आमलकचूर्णम् | २२९१ | ५ |
| विडङ्गलेहः | २२९२ | ४ |
| आमलकावलेहोऽपरः | २२९२ | ७ |
| नागबलारसायनम् | २२९३ | ८ |
| बलादियोगाः | २२९५ | ५ |
| भल्लातकक्षीरम् | २२९६ | ३ |
| भल्लातकक्षौद्रम् | २२९८ | ५ |
| भल्लातकतैलम् | २२९९ | १ |
| अध्यायपादोपसंहारः | २३०० | ४ |
| करप्रचितीयरसायनपादः | २३०३ | १ |
| आमलकायसं ब्राह्मरसायनम् | २३०३ | ३ |
| केवलामलकरसायनम् | २३०५ | ८ |
| लौहादिरसायनम् | २३०७ | ६ |
| ऐन्द्ररसायनम् | २३०९ | · |
| मेधाकररसायनानि | २३१० | १८ |
| पिप्पलीरसायनम् | २३११ | ४ |
| वर्द्धमानपिप्पलीरसायनम् | २३१२ | १ |
| त्रिफलारसायनानि | २३१५ | १ |
| शिलाजतुरसायनम् | २३१६ | ८ |
| अध्यायपादोपसंहारः | २३२२ | २ |
| आयुर्व्वेदसमुत्थानीयरसायनपादः | २३२१ | १ |
| आयुर्व्वेदसमुत्थानविवरणम् | २३२३ | ३ |
| इन्द्रोक्तं रसायनम् | २३२६ | ४ |
| द्रोणीप्रावेशिकरसायनम् | २३२७ | ४ |
| इन्द्रोक्तं ब्राह्मरसायनम् | २३३१ | ७ |
| कुटीप्रावेशिकवातातपिकरसायनार्हाणां निरूपणम् | २३३८ | १ |
| रसायनविधिभ्रंशाज्जातव्याधीनां चिकित्साविधिः | २३३८ | ५ |
| आचाररसायनम् | २३३९ | १ |
| अश्विपूजने हेतुः | २३४१ | १ |
| भिषजां त्रिजत्वे कारणम् | २३४३ | १ |
| आतुरभिषजोः कर्त्तव्यता | २३४४ | १ |
| वृत्त्यर्थं चिकित्साया निषेधः | २३४५ | १ |
| अध्यायपादस्याध्यायस्य च उपसंहारः | २३४६ | २ |


## द्वितीयोऽध्यायः ।


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| संयोगशरमूलीयवाजीकरणपादः | २३४७ | २ |
| वाजीकरणस्यावश्यकता | २३४७ | ४ |
| पुरुषभेदेन वृष्यतमाया लक्षणम् | २३५० | १ |
| निरपत्यनरस्य निन्दा | २३५१ | ५ |
| बहुप्रजस्य स्तुतिः | २३५२ | ३ |

त्रिफलात्वचोऽर्द्धपलिकाः पटोलपत्रञ्च कार्षिकाः शेषाः।
कटुरोहिणी सनिम्बा यष्ट्याह्वा त्रायमाणा च॥
एष कषायः साध्यो दत्त्वा द्विपलं मसूरविदलानाम्।
सलिलाढ़केऽष्टभागे शेषे पूतो रसो ग्राह्यः॥
तत्र कषायेऽष्टपले * चतुःपलं सर्पिषश्च पक्तव्यम्।
यावत् स्यादष्टपलं शेषं पेयं ततः कोष्णम्॥
तद् वातपित्तकुष्ठं वीसर्पं वातशोणितं प्रबलम्।
ज्वरदाहगुल्मविद्रधिविभ्रमविस्फोटकं हन्यात्॥ ७८॥

त्रैफलक्वाथः।

गङ्गाधरः—त्रिफलेत्यादि। त्रिफलाया अस्थीनि त्यक्त्वा त्वचोऽर्द्धपलिकाः प्रत्येकम्। पटोलपत्रञ्चार्द्धपलिकम्। शेषाः कटुरोहिण्यादयश्चत्वारः कार्षिकाः प्रत्येकम्। तत्र मसूरविदलानां द्विपलं दत्त्वा कषायः। एष सलिलाढ़केऽष्ट-शरावे द्वैगुण्याभावविवक्षातः साध्यः। अष्टभागशेषेऽष्टपले शेषे पूतो वस्त्रपूतं कृत्वा रसो ग्राह्यः। तत्र शरावमिते कषाये घृतस्य चतुष्पलं पक्तव्यम्, शेषन्तु अष्टपलं कार्य्यम्। तदष्टपलं कोष्णं पेयं कुष्ठिभिः प्रतिदिनम् एवं कृत्वा कृत्वा पेयं बलदेहाग्निबलमवेक्ष्य न्यूनाधिक्यं मात्रायाः कार्य्यमिति युक्तिः। तदित्यादिराशीः। त्रैफलक्वाथः॥ ७८॥

चक्रपाणिः—त्रिफलेति। निस्तुषमसूराणां विदला न तु मसूरविदला अत्र श्यामा। उक्तं हि जतूकर्णे—पुंलिङ्गेन * * मसूरविदलात् पलमिति। अष्टभागे इति षोड़शपले। अत एवाग्रे कषायाष्टपले इति प्रथमाद्विवचनान्तं षोड़शपलमाह। अत्र चाष्टाविंशत्युत्तरपलशतमानस्याष्ट-भागशेषे षोड़श पलानि भवन्ति। तच्च द्रवषोड़शपलमष्टपलशब्देनाकृतद्वैगुण्यमेवोच्यते, यदि पलोपरि द्रवद्वैगुण्यं स्यात् तदा षोड़शपलेन द्वात्रिंशत्पलानि स्युः। न चेह भागशेषे द्वात्रिंशत्पलत्वं किन्तु षोड़शपलत्वमेव, तेनैतत् स्यादष्टपलशब्देनाकृतद्वैगुण्याद् द्रवषोड़शपलग्रहणन्तु नोन्नीयते। यत्पलोल्लेखनाद् द्वैगुण्यं नास्ति किन्तु कुड़वादावेव द्रवद्वैगुण्यमिहानुमतस्य, तन्त्रान्तरेऽपि सम्मतमिति। यावत् स्यादष्टपलमित्यनेन कषायचतुःपलेन सम्भूतस्याष्टपलं स्यात्प्र दर्शयति। यैषा च मात्रा कुष्ठिनां भूरिमात्रद्रव्यसाध्यत्वेनोत्तमा ज्ञेया॥ ७८॥

* कषायाष्टपले इति चक्रः।



निम्बपटोलं दार्व्वीं दुरालभां तिक्तरोहिणीं त्रिफलाम्।
कुर्य्यादर्द्धपलांशां पर्पटकं त्रायमाणाञ्च॥
सलिलाढ़कसिद्धानां रसेऽष्टभागे स्थिते क्षिपेत् पूते।
चन्दनकिराततिक्तकमागधिकात्रायमाणाश्च॥
मुस्तं वत्सकवीजं कल्कीकृत्यार्द्धकार्षिकान् भागान्।
नवसर्पिषश्च षट्पलमेतत् तिक्तकं घृतं पेयम्॥
कुष्ठज्वरगुल्मार्शोग्रहणीपाण्ड्वामयश्वयथुहारि।
पामाविसर्पपिड़काकण्डूमदगण्डनुत् सिद्धम्॥ ७९॥

तिक्तषट्पलकं घृतम्।

सप्तच्छदं प्रतिविषां शम्याकं तिक्तरोहिणीं पाठाम्।
मुस्तमुशीरं त्रिफलां पटोलपिचुमर्दपर्पटकम्॥
धन्वयवासं चन्दनमुपकुल्यां पद्मकं हरिद्रे द्वे।
षड्ग्रन्थां सविशालां शतावरीं शारिवे चोभे॥

गङ्गाधरः—निम्बपटोलमित्यादि। निम्बस्य वल्कलं पटोलस्य पत्रं, तिक्तरोहिणी कटुकरोहिणी। पर्पटकं त्रायमाणा चेति। सर्व्वेषामेवार्द्ध-पलांशं कुर्य्यात्। सलिलाढ़के कृतद्वैगुण्यात् षोड़शशरावे सिद्धानामेषां निम्बादीनां रसेऽष्टभागस्थिते शरावद्वयस्थिते पूते वस्त्रपूतं कृत्वा तत्र क्वाथे चन्दनादिवत्सकवीजान्तान् षट् प्रत्येकं कार्षिकान् भागान् कल्कीकृत्य क्षिपेत्। नवसर्पिषश्च षट्पलं तत्रैव क्षिपेत्। पक्त्वा घृतावशेषमवतार्य्य पूत्वा मात्रया एतत् तिक्तकं षट्पलकं घृतं पेयम्। अस्याशीः कुष्ठज्वरेत्यादिः। तिक्तषट्-पलकं घृतम्॥ ७९॥

गङ्गाधरः—सप्तच्छदमित्यादि। उपकुल्यां कृष्णजीरकम्। शारिवे चोभे इति

चक्रपाणिः—निम्बपटोलमित्यादिना तिक्तषट्पलकमाह। सर्पिश्चाप्यनवं हितमिति वचनस्य बाधकमिह योगमहिम्ना सर्पिषो नवत्वं ज्ञेयम्। प्रथमं सर्पिश्च इति पदं मानार्थं द्वितीयन्तु पूतमिति पदं पेयत्वोपदर्शनार्थम्॥ ७९॥

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्

# चरक-संहिता

**महामुनिना भगवताग्निवेशेन प्रणीता**
**महर्षिचरकेण दृढ़बलेन च प्रतिसंस्कृता**

**चरकचतुराननश्रीमच्चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाख्यटीकया**
**महामहोपाध्याय-श्रीगङ्गाधरकविरत्न कविराजविरचितया**
**जल्पकल्पतरुसमाख्यया टीकया च समलङ्कृता**

**कविराज श्रीनरेन्द्रनाथ सेनगुप्तेन**
**कविराज श्रीबलाइचन्द्र सेनगुप्तेन च**
सम्पादिता संशोधिता प्रकाशिता च

चिकित्सित-कल्प-सिद्धिनामकस्थानत्रयसमन्वित:

## पंचम खण्डः

चिकित्सास्थान १९ से ३० अध्याय
कला-सिद्धिनामकस्थान, समाप्तम्


## राष्ट्रिय-संस्कृत-संस्थानम्

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

The firm will replace the copy/copies free of cost if any defect is found

प्रकाशक:

**राष्ट्रिय-संस्कृत-संस्थानम्**

(मानित विश्वविद्यालय:)

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली-110058

**पुनर्मुद्रित संस्करण : 2011**

**मूल्य : ₹ 610.00**

**(1-5 भाग सम्पूर्ण)**

मुद्रक :

**चौखम्भा ओरियन्टालिया**

(प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक)

बंग्लो रोड, 9-यू.बी., जवाहर नगर, (कमला नगर के पास)

दिल्ली-110007

**Published under the "reprint scheme" of**
**Rashtriya Sanskrit Sansthan**

# CARAKA-SAMHITĀ

*by*

**The Great Sage Bhagavata Agniveśa**
**Thoroughly revised by**
**Maharṣi Caraka and Dṛdhavala**

*With*

**Āyurvedadīpikā' Commentaries of Śrīmat Cakrapāṇidatta and 'Jalpakalpataru' Explanatory Notes and Annotations of Mahamahopādhyāya Śrī Gaṅgādhar Kaviratna Kavirāja**

*Edited and Revised by*

**Kaviraja Shree Narendranath Sengupta**
&
**Kaviraja Shree Balaichandra Sengupta**

Cikitsita-Kalpa-Siddhināmakasthāna

**(Fifth Part)**

Cikitsasthana 19 to 30 Chapters
Kala-Siddhinamakasthāna, Samaptam

**RASHTRIYA SANSKRIT SANSTHAN**
56-57, Institutional Area, Janakpuri,
New Delhi-110058

The firm will replace the copy/copies free of cost if any defect is found

*Published by*
**Rashtriya Sanskrit Sansthan**
(Deemed University)
56-57, Institutional Area, Janakpuri,
New Delhi-110058

**Reprint : 2011**

Printed by
**CHAUKHAMBHA ORIENTALIA**
*(A House of Ayurvedic & Indological Books)*
Bungalow Road, 9-U.B., Jawahar Nagar
(Near Kamla Nagar), Delhi-110 007

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासं गताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविध प्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाश-नार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविध ग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **भगवताग्निवेशेन प्रणीता चरक-संहिता, पंचम खण्डः** इति नामकः **आयुर्वेदः ग्रन्थः** संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**- राधावल्लभः त्रिपाठी**

## एकोनविंशोऽध्यायः ।

### अथातोऽतीसारचिकित्सितं व्याख्यास्यामः,

### इतिह स्माह भगवानात्रेयः ॥ १ ॥

भगवन्तं खल्वात्रेयं कृताह्निकं हुताग्निहोत्रमासीनमृषिगण-परिवृतं हिमवत्पार्श्वे विनयादुपेत्याभिवाद्याग्निवेश उवाच, भगवन्नतीसारस्य प्रागुत्पत्तिनिमित्तलक्षणोपशमनानि तु प्रजानु-ग्रहार्थमाख्यातुमर्हसीति ॥ २ ॥

अथ भगवान् पुनर्व्वसुरात्रेयस्तदग्निवेशवचनमनुनिशम्य उवाच—श्रूयतामग्निवेश ! सर्व्वमेतदखिलेन व्याख्यायमानम् । आदिकाले तु यज्ञेषु पशवः समालम्भनीया बभूवुर्नालम्भाय प्रक्रियन्ते स्म । ततो दक्षयज्ञं प्रत्यवरकालं मनोः पुत्राणां नरिष्यन्नाभागेक्ष्वाकुदिष्टशर्य्यात्यादीनां क्रतुषु पशव एवाभ्यनु-

<u>गङ्गाधरः</u>—उद्दिष्टानुक्रमात् कासचिकित्सितानन्तरमतिसारचिकित्सित-माह—अथात इत्यादि । पूर्व्ववत् सर्व्वं व्याख्येयम् ॥ १ ॥

<u>गङ्गाधरः</u>—भगवन्तमित्यादि । अग्निवेश ऋषिर्हिमवत उत्तरे पार्श्वे आसीनम् आत्रेयं विनयादुपेत्याभिवाद्य चोवाच । तद् यथा—भगवन्नित्यादि ॥ २ ॥

<u>गङ्गाधरः</u>—तदुत्तरमाहात्रेयः—अथेत्यादि । अतिसाररोगस्य प्रागुत्पत्ति-पुराण्त्तमुवाच । आदिकाल इत्यादि । दक्षयज्ञं प्रति अवरकालं दक्षयज्ञादनन्तरं बहुकाले व्यतीते मनोः पुत्राणां नरिष्यन्नाभागादीनां क्रतुषु पशव एवाभ्य-

<u>चक्रपाणिः</u>—अग्निबलहानिसामान्यात् ग्रहणीदोषमनु अतिसारचिकित्सिते वक्तव्ये उपोद्घात-तया पाण्डुरोगादिभिर्व्यवधानं कृतं, सम्प्रति तु उपोद्घातोक्तपाण्डुरोगादीनभिधाय प्रकृतमतीसार-चिकित्सितमुच्यते । प्रागुत्पत्तिरिति प्राक्कालोत्पत्तिः ॥ १ । २ ॥

<u>चक्रपाणिः</u>—आदिकाले इति कृतयुगे । समालभनीया इति मन्त्रेण अभिमन्त्रैणव परित्याज्या बभूवुः न आलम्भार्थम् प्रक्रियन्ते स्म इति आलम्भाय मारणाय न प्रक्रियन्ते न संस्क्रियन्त इत्यर्थः । नारिष्यन्नाभागादिमनुपुत्रेषु । एवमेव मनुपुत्रमुदाहार्य्यं यज्ञादिशब्दः क्रियते तदा तेषां

विंशतिर्व्यापदो योनेर्निर्द्दिष्टा रोगसंग्रहे ।
मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च ।
जायन्ते वीजदोषाच्च दैवाच्च शृणु ताः पृथक् ॥ ३ ॥
वातलाहारचेष्टाया वातलायाः समीरणः ।
विवृद्धो योनिमाश्रित्य योनेस्तोदं सवेदनम् ॥
स्तम्भं पिपीलिकासृप्तिमिव कर्कशतां तथा ।
करोति सुप्तिमायासं वातजांश्चापरान् गदान् ।
सा स्यात् सशब्दरुक् फेन-तनुरूक्षार्त्तवानिलात् ॥ ४ ॥
व्यापल्लवणकट्वम्ल-क्षाराद्यैः पित्तजा भवेत् ।
दाहपाकज्वरोष्णार्त्ता नीलपीतसितार्त्तवा ।
भृशोष्णकुणपस्रावा योनिः स्यात् पित्तदूषिता ॥ ५ ॥

गङ्गाधरः—तद्यथा। विंशतिरित्यादि। रोगसंग्रहेऽष्टोदरीयेऽध्याये। ता योनिव्यापदः स्त्रीणां मिथ्याचारेण प्रदुष्टेनार्त्तवेन च जायन्ते वीजदोषाच्च जायन्ते दैवाच्च दिष्टाज्जायन्ते ताः पृथक् विंशतिं शृण ॥ ३ ॥

गङ्गाधरः—वातलेत्यादि। वातलायाः जन्मप्रभृतिवातोल्वणप्रकृतिकाया नार्य्याः। पिपीलिकानां सृप्तिं सर्पणमिव आर्त्तवप्रवृत्तिकाले सशब्दं सरुक् च यथा स्यात् तथा सफेनं तनु चाघनं रूक्षञ्चार्त्तवं सा योनिः सृजेदिति। सशब्दाद्यार्त्तवा सा योनिः स्यात् ॥ ४ ॥

गङ्गाधरः—व्यापदित्यादि। लवणादीनामतिसेवनात् पित्तजा योनेर्व्यापद् भवेत्। तस्य लक्षणमाह—दाहेत्यादि। सा पित्तदूषिता पित्तजव्यापद्युता योनिर्दाहाद्यार्त्ता नीलाद्यार्त्तवा भृशोष्णादिस्रावा स्यात् ॥ ५ ॥

चारात्। रोगसंग्रह इति अष्टोदरीये। मिथ्याचारेण असम्यगाचरणेन। प्रदुष्टेनार्त्तवेनेति वातादिदुष्टार्त्तवेन योनिव्यापद् भवति। वीजदोषादिति वीजार्त्तवदोषात्। दैवादिति अकर्म्मवशात्। एतेषाञ्च यथायोग्यतया कारणत्वम् अग्रे वक्ष्यमाणकारणत्वभेदेन योनिव्यापत्सु उपपादितमेव, दैवन्तु सर्व्वत्रैव साधारणकारणम् ॥ १—३ ॥

चक्रपाणिः—वातलाया इति विशेषेण वातलयोनिव्यापदुत्पादोपदर्शनार्थम्। पिपीलिकासृप्तिमिति पिपीलिका-परिसर्पणाकारा वेदना। सशब्दरुक्फेनतनुरूक्षार्त्तवेति एवम्भूतार्त्तवा भवति,

कफोऽभिष्यन्दिभिर्वृद्धो योनिञ्चेद् दूषयेत् स्त्रियाः ।
स कुर्य्यात् पिच्छिलां शीतां कण्डूग्रस्तामवेदनाम् ।
पाण्डुवर्णां तथा पाण्डु-पिच्छिलार्त्तववाहिनीम् ॥ ६ ॥
समाश्रित्य * रसान् सर्व्वान् दूषयित्वा त्रयो मलाः ।
योनिगर्भाशयस्थाः स्वैर्योनिं युञ्जन्ति लक्षणैः ।
सा भवेद् दाहशूलार्त्ता शुक्लपिच्छिलवाहिनी ॥ ७ ॥
पित्तरक्तकरैर्नार्य्या रक्तं पित्तेन दूषितम् ।
अतिप्रवर्त्तते योन्यां लब्धे गर्भेऽपि सास्रजा ॥
योनिगर्भाशयस्थं चेत् पित्तं संदूषयेदसृक् ।
सारजस्का मता कार्श्य-वैवर्ण्यजननी भृशम् ॥ ८ ॥

गङ्गाधरः—कफ इत्यादि। पाण्डुत्वमार्त्तवस्य कफकृतश्वेतमिश्रितत्वेन रक्तवर्णस्य ॥ ६ ॥

गङ्गाधरः—समाश्रित्येत्यादि। त्रयो मलाः सर्व्वान् रसान् शारीरान् दूषयित्वा योनिगर्भाशयस्थाः स्वैर्वातादिलिङ्गैर्योनिं युञ्जन्ति। ततः सा योनिर्दाहशूलार्त्ता शुक्लपिच्छिलद्रववाहिनी स्यात् ॥ ७ ॥

गङ्गाधरः—पित्तेत्यादि। पित्तरक्तकरैर्द्रव्यैः। सास्रजा गर्भे लब्धेऽपि सार्त्तवा भवति। इत्येषा रक्तयोनिः। योनीत्यादि। योनिगर्भाशययोरुभयोः स्थितं दुष्टं पित्तञ्चेदार्त्तवं दूषयेत् तदा सा योनिररजस्का मता देहकार्श्यादिजननी ॥ ८ ॥

तेन वातिकरूपा योनिव्यापत्। एवमेव पैत्तिकश्लैष्मिकसान्निपातिकयोनिव्यापदामपि पैत्तिककफजसान्निपातिकदोषप्रभवत्वं वर्णयन्ति। रक्तयोनिरिह असृक्दरसंज्ञया चिकित्साप्रस्तावे वक्तव्या। नैवम्, ये तु एतद्व्यापदां प्रदरं भिन्नमेव मन्यन्ते तेषामत्र विरोधः। इति प्रदरचिकित्सार्थं प्रकरणान्तरम् अत्राध्याये पठिष्यन्ति। समश्नन्त्या इति पथ्यापथ्यमेलकेनोपयुञ्जानाया भक्षयन्त्याः ॥ ४—७ ॥

चक्रपाणिः—रक्तपित्तकरैरित्यादौ गर्भे लब्धेऽपि रक्तमतिप्रवर्त्तते तेनास्या गर्भो भवति। सा अप्रजा रक्तयोनिः इत्यर्थः। ये तु सास्रजा इति पठन्ति ते यस्यां लब्धेऽपि गर्भे अस्रमतिप्रवर्त्तते सा ताहशरक्तस्रुत्या अस्रजा भवतीति वदन्ति। योनौ गर्भे तिष्ठतीति योनिगर्भाशयस्था सा अरजस्केति अनार्त्तवा ॥

* समाश्रित्य

२६

शार्ङ्गं ताम्रं वैदूर्य्यकांस्यजम्। आयसानि च योज्यानि शलाकाश्च यथाक्रमम्। वक्त्रयोर्मुकुलाकारा कलायपरिमण्डला। अष्टाङ्गुला तनुर्मध्ये सुकृता साधु-निग्रहा। औडुम्बर्य्यश्मजातापि शारीरी वा हिता भवेत्। वामेनाक्षि विनिर्भुज्य हस्तेन सुसमाहितः। शलाकया दक्षिणेन क्षिपेत् कानीनमञ्जनम्। आपाङ्गं वा यथायोग्यं कुर्य्याच्चापि गतागतम्। वर्त्मोपलेपि वा यत् तदङ्गुल्यैव प्रयोजयेत्। अक्षि नात्यन्तयोरञ्ज्याद् बाधमानोऽपि वा भिषक्। न वा निर्वान्तदोषेऽक्षिणि धावनं सम्प्रयोजयेत्। दोषः प्रतिनिवृत्तः सन् हन्याद् दृष्टेर्बलन्तथा। गत-दोषमपेतास्रु पश्चाद् यत् सम्यगम्भसा। प्रक्षाल्याक्षि यथादोषं कार्य्यं प्रत्यञ्जनं ततः। श्रमोदावर्त्तरुदित-मद्यक्रोधभयज्वरैः। वेगाघातशिरोदोषैश्चार्त्तानां नेष्यते-ऽञ्जनमिति ॥ ३३ ॥

गङ्गाधरः—ग्रन्थं समापयति—अग्नीत्यादि ॥

अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते। सिद्धिस्थानेऽष्टमेऽप्राप्ते तस्मिन् दृढ़बलेन तु। प्रतिसंस्कृत एवात्र द्वादशाध्याय एव च। स्यादुत्तरवस्तिसिद्धिः समाप्ता तत्र वै पुनः। गङ्गाधरेण वैद्येन जल्पकल्पतरौ कृते। सिद्धिस्थानेऽष्टमे स्कन्धे शाखा तु द्वादशी मता। स्यादुत्तरवस्तिसिद्धि-जल्पाख्या सम्प्रपञ्चिता।

इत्युत्तरवस्तिसिद्धि-जल्पाख्या द्वादशी शाखा ॥ १२ ॥

द्वादशाध्यायिकमष्टमं सिद्धिस्थानं समाप्तम्।

अष्टस्थानीचरकसंहितायुर्व्वेदः समाप्तः ॥

॥ ओं शिवः ॥

॥ श्रीः ॥